# shrIviShNorakArAdyaShTottarashatanAmArthavivaraNam

# શ્રીવિષ્ણોરકારાદ્યષ્ટોત્તરશતનામાર્થવિવરણમ્

## Document Information

Text title : viShNorakArAdyaShTottarashatanAmArthavivaraNam

File name : viShNorakArAdyaShTottarashatanAmArthavivaraNam.itx

Category : vishhnu

Location : doc_vishhnu

Proofread by : PSA Easwaran psawaswaran at gmail.com

Description/comments : Edited by S. V. Radhakrishna Shastriji

Acknowledge-Permission: Mahaperiaval Trust

Latest update : April 12, 2018

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 17, 2023

*sanskritdocuments.org*

# શ્રીવિષ્ણોરકારાદ્યષ્ટોત્તરશતનામાર્થવિવરણમ્

(શ્રીવિષ્ણુસહસ્રનામાવલ્યન્તર્ગતં)
અતીતોऽ યં ક્ષરં યસ્માત્ અક્ષરઃ પ્રોચ્યતે તતઃ । ૧૭
અયં ન જાયતે યસ્માત્ અજ ઇત્યુચ્યતે તતઃ ॥ ૯૫
અયં ન ચ્યવતે યસ્માત્સ્વસ્થિતેરચ્યુતસ્તતઃ । ૧૦૦
અમોઘો યસ્ય સઙ્કલ્પો મોઘો ચ સ્યાત્કદાચન ॥ ૧૧૦
અનિરુદ્ધો ન કેનાપિ નિરુદ્ધઃ સંયુગાદિષુ । ૧૮૫
અયં હ્યનિમિષો નિત્યં જાગરૂકોऽવનાદિષુ ॥ ૨૧૫
અગ્રે સર્વસ્ય નેતૃત્વાદ્ અગ્રણીઃ ઉચ્યતે પ્રભુઃ । ૨૧૮
અવ્યયોऽયં સર્વગતિઃન વ્યેતિ ચ કુતશ્ચન ॥ ૧૩
અનાદિત્વાદનન્તત્વાત્ અનાદિનિધનો હ્યસૌ । ૪૩
અમેયાત્મા યતો હ્યાત્મા માનૈર્માતું ચ શક્યતે ॥ ૧૦૧
અસમ્મિતો યતો નાસ્ય દેશકાલવ્યવસ્થિતિઃ । ૧૦૮
અનિલો યસ્ય નાધારઃ સર્વભૂતધરો હ્યસૌ ॥ ૨૩૪
અગમ્યત્વાત્પ્રમાણાનાં અપ્રમેય ઇતિ સ્મૃતઃ । ૪૭
અપક્ષયવિહીનત્વાત્પુનરેવાયમવ્યયઃ ॥ ૩૧
અગ્રાહ્યાત્વાન્મનોવાચાંઅગ્રાહ્ય ઇતિ કીર્ત્યતે । ૫૬
અમૃતઃ કીર્તિતો યસ્માન્નિત્યો મરણવર્જિતઃ ॥ ૧૧૯
અવ્યઙ્ગો હરિરેવસ્યાદ્યતઃ સર્વાઙ્ગસુન્દરઃ । ૧૨૯
અચ્યુતોऽયં યતો ભક્તાન્ન કદાપિ વિમુઞ્ચતિ ॥ ૧૦૦
અતુલો યસ્ય નાસ્ત્યેવ સદૃશો ભુવનત્રયે । ૩૫૫
અતીન્દ્રોऽયં યતો વીર્યાદિન્દ્રમત્યેતિ ભૂરિશઃ ॥ ૧૫૭
અતીન્દ્રિયો યતોऽગમ્ય ઇન્દ્રિયૈશ્ચક્ષુરાદિભિઃ । ૧૬૯
અગ્રાહ્યશ્ચક્ષુષા બુદ્ધ્યા તતોऽદૃશ્યઃ સ ઉચ્યતે ॥ ૫૬
અશક્યત્વાત્સુનિર્દેષ્ટુમનિર્દેશ્યવપુઃ સ્મૃતઃ । ૧૭૭
અન્તકત્વાત્સ સર્વેષાં પ્રાણિનામન્તકઃ સ્મૃતઃ ॥ ૫૨૦

અનુત્તમો યતસ્તસ્માદુત્તમો નૈવ વિદ્યતે । ૮૧
અનઘોઽયં સદા શુદ્ધઃ પાપસંસર્ગવર્જિતઃ ॥ ૧૪૬
અમોઘા યસ્ય પાદાબ્જસેવા મોઘા કદાપિ ન । ૧૫૪
અયં સ્યાદપ્રમેયાત્મા યઃ પ્રત્યક્ષાદ્યગોચરઃ ॥ ૨૪૮
અશેષસ્યાપિ લોકસ્ય હ્યત્તૃત્વાદમિતાશનઃ । ૩૭૨
અહઃ સંવર્તકો યસ્માદ્દિવસાનાં પ્રવર્તકઃ ॥ ૨૩૨
અનન્તજિદ્યતો જેતા સર્વેષામપિ યુધ્યતામ્ । ૩૦૭
અનુત્પન્નઃ કદાપીતિ સોઽભૂરિત્યભિધીયતે ॥ ૪૩૭
અજિતો યો ન કેનાપિ કદાચિદપિ નિર્જિતઃ ॥ ૫૪૯
અચ્યુતઃ સતતં સિદ્ધઃ ચ્યુતિહેતોરભાવતઃ ॥ ૫૫૨
અનન્તગુણસમ્પત્તેઃ અસઙ્ખ્યેયઃ સ ઉચ્યતે । ૨૪૭
એષ એવામૃતવપુઃ યદ્વપુર્મૃતિવર્જિતમ્ ॥ ૮૧૪
અર્થોઽસાવર્થ્યમાનત્વાત્પુરુષાર્થસ્વરૂપતઃ । ૪૩૦
અનર્થોઽયં યતો લોકે તેન પ્રાર્થ્યં ચ કિઞ્ચન ॥ ૪૮૧
અમેયો વિક્રમો યસ્ય પ્રોચ્યતેઽમિતવિક્રમઃ । ૫૧૬
અવિજ્ઞાતા યતો ભિન્નો વિજ્ઞાતુઃ જીવશબ્દિતાત્ ॥ ૪૮૨
અક્ષિણી યસ્ય પદ્માભે સોઽરવિન્દાક્ષ ઈર્યતે । ૩૪૭
અનુકૂલઃ સ સર્વેષાં સ્થિતિરક્ષણતત્પરઃ ॥ ૩૪૨
અહસ્કરસ્વરૂપત્વાદેષોઽપ્યહરિતીર્યતે । ૯૦
અપાં નિધિર્યતસ્તસ્ય સ્યાદ્વિભૂતિર્હિ સાગરઃ ॥ ૩૨૩
અમૃતાંશૂદ્ભવસ્તસ્માત્ ચન્દ્રસ્યાપિ સમુત્થિતેઃ । ૨૮૩
અમૃત્યુઃ સ યતો મૃત્યોરપિ મૃત્યુર્ભવત્યસૌ ॥ ૧૯૮
અમરાણામશેષાણાં પ્રભુત્વાદમરપ્રભુઃ । ૪૯
અક્ષરો ચ ક્ષરત્યેષ સચ્ચિદાનન્દલક્ષણાત્ ॥ ૧૭
અગાધત્વાદ્ગભીરત્વાદમ્ભોનિધિરિતિ સ્મૃતઃ । ૫૧૭
અશેષવસ્તુરૂપત્વાદનન્તાત્મેતિ વિશ્રુતઃ ॥ ૫૩૮
અજ ઇત્યુચ્યતે વિષ્ણુર્વિરાડ્રૂપેણ સંસ્થિતેઃ । ૨૦૪
અનલઃ કીર્ત્યતે વિષ્ણુઃ પરઞ્જ્યોતિઃસ્વરૂપતઃ ॥ ૨૯૩
અસદિત્યુચ્યતે તસ્ય નાગરૂપાદ્યભાવતઃ । ૪૭૯
અધઃ કૃત્વાઽક્ષજા વૃત્તીઃ જ્ઞેયસ્તસ્માદધોક્ષજઃ ॥ ૪૧૫
અશોકો નિત્યમેવાસૌ નિત્યાનન્દસ્વરૂપતઃ । ૩૩૬
નિજાનન્દસુધાપાનનિરતોઽમૃતપઃ સ્મૃતઃ ।

અનીશઃ ખલુ સર્વેષાં ઈશાનોઽયમિતિ સ્મૃતઃ । ૬૨૬
અશેષબન્ધનિર્મુક્તો યોઽનિરુદ્ધઃ સ એવ હિ । ૬૩૮
અનવચ્છિન્નશૌર્યત્વાત્પ્રોચ્યતેઽમિતવિક્રમઃ ॥ ૬૪૧
અનિર્વિણ્ણઃ સદૈવાસૌ નિત્યતૃપ્તસ્વભાવતઃ । ૪૨૫
અનયોઽયં યતો નેતા નાસ્તિ લોકત્રયેઽપિ ચ ॥ ૪૦૦
અનન્તો યોઽપરિચ્છિન્નો દેશકાલાન્યવસ્તુભિઃ । ૫૨૮
અયમેવાવિધેયાત્મા સ્વતન્ત્રઃ સર્વથા સદા । ૬૨૧
અપરાજિત ઇત્યુક્તો યસ્ય નાસ્તિ પરાજિતિઃ ॥ ૭૧૬
અધિષ્ઠાનં પ્રપઞ્ચસ્ય માયાકલ્પિતવસ્તુનઃ । ૩૨૪
અનન્તં યસ્ય ચૈશ્વર્યં અનન્તશ્રીઃ સ એવ હિ ॥ ૯૩૩
અપ્રમત્તો ભવેદ્યસ્માત્પ્રમાદરહિતઃ સદા । ૩૨૫
અશેષસ્ય લયે મુક્તૌ પ્રાપ્યત્વાદપ્યયઃ સદા ॥ ૯૦૦
અશેષાણાં ચ ભૂતાનાં પુરા સિદ્ધોઽગ્રજઃ સ્મૃતઃ । ૮૯૧
અયોનિજો યતો નાસ્ય કર્માધીના જનિર્ભવેત્ ॥ ૫૭૩
અનિવર્તી નિવર્તન્તે યં પ્રાપ્ય ન કદાચન । ૫૯૬
અર્કો ભાસ્કરમધ્યસ્થજ્યોતીરૂપેણ સંસ્થિતઃ ॥ ૭૯૫
અનિર્દેશ્યવપુર્યસ્માન્નિર્દેશાર્હં ન તદ્વપુઃ । ૬૫૬
અશેષૈઃ પૂજ્યમાનૈશ્ચ પૂજ્યમાનોઽર્ચિતઃ ખલુ ॥ ૬૩૪
અર્ચિસ્માન્દીપ્તિમાનેષ સ્વયઞ્જ્યોતિઃ સ્વભાવતઃ । ૬૩૩
રથી ચાસ્ય સમો નૈવ તેનાપ્રતિરથઃ સ્મૃતઃ ॥ ૬૩૯
અન્તો નાસ્ત્યસ્ય રૂપસ્યાનન્તરૂપો ભવત્યતઃ । ૯૩૨
અનિશં જયશીલોઽસૌ તસ્માત્પ્રોક્તોઽપરાજિતઃ ॥ ૮૬૨
અનામયો યતો વ્યાધિરાધિર્વાઽસ્ય ચ જાયતે । ૬૮૯
અનલોઽગ્નિસમાનોઽયં તેજઃપુઞ્જસ્વભાવતઃ ॥ ૭૧૧
અસ્ય ક્ષોભણકૃન્નૈવ વિદ્યતેઽક્ષોભ્ય એવ સઃ । ૯૯૯
અનેકમૂર્તરિત્યુક્તઃ સર્વાસ્તસ્યૈવ મૂર્તયઃ ॥ ૭૨૧
અમૂર્તિમાન્નિગૂઢત્વાન્મૂર્તિમત્સ્વખિલેષ્વપિ । ૭૨૦
અમૃતાશઃ સ્વયં ચાશ્નન્પ્રાશયત્યમૃતં સુરાન્ ॥ ૮૧૩
અચલો વ્યાપ્તરૂપત્વાત્ક્વચિત્ ચલનવર્જિતઃ । ૭૪૫
અહઙ્કારાદિમાનિત્વરિક્તોઽમાનીતિ કીર્ત્યતે ॥ ૭૪૭
અધૃતોઽન્યેન કેનાપિ સ્વયં ધત્તેઽખિલં જગત્ ॥ ૮૪૨
અણીયાન્ન યતઃ કશ્ચિત્તસ્માદણુરિતિ સ્મૃતઃ ॥ ૮૩૫

અનિલો વાયુરૂપેણ ચેષ્ટયત્યખિલં જગત્ । ૮૧૨
અચિન્ત્યરચનારૂપજગત્સ્રષ્ટાઽદ્ભુતઃ કિલ ॥ ૮૯૫
અમૂર્તિઃ સ યતસ્તસ્ય મૂર્તિઃ કાઽપિ ન વિદ્યતે । ૮૩૦
અર્હઃ પૂજ્યતમૈઃ સર્વૈઃ પૂજ્યમાનો નિરન્તરમ્ ॥ ૮૭૦
અભિપ્રાયઃ સ સર્વેષાં પ્રાણિનાં મનસિ સ્થિતઃ । ૮૭૧
અચિન્ત્યોઽયં યતશ્ચિન્તાવિષયો ન કદાચન ॥ ૮૩૨
અનિર્વિણ્ણઃ સદાઽઽનન્દી નિર્વેદસ્યાપ્રસક્તિતઃ । ૮૯૨
અજન્યત્વાત્સદાસિદ્ધો હ્યનાદિઃ સ સનાતનઃ ॥ ૯૪૧
અયં ભોજ્યસ્વરૂપેણ સ્થિતત્વાદન્નમુચ્યતે । ૯૮૩
અયં ભોક્તૃસ્વરૂપેણ તિષ્ઠન્નન્નાદ ઉચ્યતે ॥ ૯૮૪
અનુત્પન્નસ્વભાવત્વાદજ ઇત્યુચ્યતે બુધૈઃ । ૫૨૧
અવ્યક્તો નામરૂપાદિવ્યઞ્જકાનામભાવતઃ ॥ ૭૨૨
અક્રૂરઃ ક્રૂરચેષ્ટાનાં હિંસાદીનાં વિવર્જનાત્ । ૯૧૫
અમેયાત્મા ન માનાર્હઃ આત્મા યસ્ય ચ કેનચિત્ ॥ ૧૭૯
અઘસ્પર્શવિહીનત્વાદનઘઃ સર્વદાઽપિ સઃ । ૮૩૧
અશ્વત્થઃ પ્રોચ્યતે દેવોઽસ્થિરલોકસ્વરૂતઃ ॥ ૮૨૪
અક્ષોભ્યઃ ક્ષોભ્યમાણોઽપિ ન ક્ષુબ્ધો ભવતિ ક્વચિત્ । ૯૯૯
અરૌદ્રો રૌદ્રવૃત્તીનાં ક્રોધાદીનામભાવતઃ ॥ ૯૦૬
અન્યધાતૃવિહીનત્વાદધાતેતિ સ કીર્ત્યતે । ૯૫૧
અન્તવત્સુ સ્થિતોઽપ્યેષ હ્યનન્તો નાશવર્જિતઃ ॥ ૫૩૬

ઇતિ શ્રીજ્ઞાનાનન્દભારતીસ્વામિવિરચિતં
વિષ્ણોરકારાદ્યષ્ટોત્તરશતનામાર્થવિવરણં સમ્પૂર્ણમ્ ।

Proofread by PSA Easwaran

*shrIviShNorakArAdyaShTottarashatanAmArthavivaraNam*
pdf was typeset on September 17, 2023

Please send corrections to *sanskrit@cheerful.com*